श्रीयादगिरि लक्ष्मीनृसिंहस्तोत्रम्

{॥ श्रीयादगिरि लक्ष्मीनृसिंहस्तोत्रम् ॥}

नरसिंह रमेश कृपा जलधे

सुरवैरि हिरण्य विदारणतः

नरलोक हितार्दरतस्सततम्

विजयीभव यादगिरीश विभो! ॥ १॥

करुणारसपूर विधेयतयाऽ

सुरबालक बाधनिवारणतः

सममेव विदारितवानसुरम्

विजयीभव यादगिरीश विभो! ॥ २॥

नरकेसरि रूपनिरूपणतः

सुरशेखर रूप निरूपकताम्

गमयन् शमयन् नरलोकरुजम्

विजयीभव यादगिरीश विभो! ॥ ३॥

जनताभिमतार्पण शीलपते

भवभीत समुद्धरणैकमते

सुरनायक नायक लोकपते

विजयीभव यादगिरीश विभो! ॥ ४॥

नरलोकभयानक रूपमिदम्

प्रधितम् रचयन् नरलोकभियाम्

सकलस्यतु शांति करोभिमतः

विजयीभव यादगिरीश विभो! ॥ ५॥

अवतार गणेश्वति चित्रपदम्

नरकेसरि मिश्रित रूपमिदम्

प्रकटीकुरुतेऽघटिते घटनाम्

तवदिव्यविधाम् नरसिंह विभो! ॥ ६॥

करुणाकलयाखिल लोकमिदम्

सकलार्थ समृद्धि रमाभरणम्

कलयन् जनिकारणकारणभो

विजयीभव यादगिरीश विभो! ॥ ७॥

पिताश्रीनृसिंहः विभुश्रीनृसिंहः

गतिश्रीनृसिंहः धनम् श्रीनृसिंहः

भजेश्रीनृसिंहम् - भजे श्रिनृसिंहम्

नृसिंहम् भजे यादशैलेशमीशम् ॥ ८॥

नमेज्ञानमात्यंतिको भक्तिभावः

नमेसाधुचर्यात्वमेवासि सर्वम्

इतीवापिविश्वास ऐषः त्वदीयः

त्वदीयोप्यहम् सर्वमेवम् त्वदीयम् ॥ ९॥

त्वदीयेसमस्ते मदीयत्वभावात्

चिरात्संभृतात् मोहितोनाथसत्यम्

इदानीम् तु लक्ष्मीशसेवाविशेषात्

निरस्तम् हि मे मोहजातम् समस्तम् ॥ १०॥

अजानतामयानाथ! जन्मकोटिशतैरपि

कृतानि सर्वपापानि क्षंतव्यानि दयामय ॥ ११॥

॥ इति श्री वांगीपुरम् नरसिंहाचार्य विरचितं

श्री यादगिरि लक्ष्मीनृसिंह स्तोत्रम् समाप्तम् ॥

Encoded and proofread by Venkata N Vangeepuram

vangeepuram@rediffmail.com

Please send corrections to sanskrit@cheerful.com

Last updated त्oday

http://sanskritdocuments.org

Yadagiri Lakshmi Narasimha Stotram Lyrics in Devanagari PDF
% File name : yAdagirilaxminRisimhastotra.itx
% Location : doc_vishhnu
% Author : vA.ngIpuram narasi.nhAchArya
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Venkata N Vangeepuram vangeepuram at rediffmail.com
% Proofread by : Venkata N Vangeepuram vangeepuram at rediffmail.com Great grandson of the composer
% Latest update : December 15, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 13, 2015] at Stotram Website